# A-I/1/22AJDS1CCTC1/23

**प्रथमसत्रार्द्धम्**

**प्रथमपत्रम्**

**जैनदर्शनम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) ×2 (अङ्कः)=20**

1. प्रमाणं किमुच्यते?
2. माणिक्यनन्दिकृतं प्रमाणलक्षणं किम्?
3. हेमचन्द्राचार्येण प्रमाणस्य किं लक्षणं प्रोक्तम्?
4. सन्निकर्षः कः?
5. 'इन्द्रियवृत्तिप्रमाणम्' इत्यनेन किं तात्पर्यम्?
6. 'ज्ञातृव्यापारः प्रमाणम्' इत्यनेन किं प्रयोजनम्?
7. 'अचेतनज्ञानवादः' इत्यनेन किं प्रोक्तम्?
8. प्रामाण्यं किमुच्यते?
9. 'सम्यग्ज्ञानं प्रमाणम्' इत्यनेन किं तात्पर्यम्?
10. अपूर्वार्थः कः?
11. 'प्रमेयकमलमार्तण्डः' इत्यस्य कः अर्थः?
12. 'तत्प्रमाणे' इति सूत्रेण किं प्रोक्तम्?
13. 'तत्त्वज्ञानं प्रमाणं ते युगपत्सर्वभासनम्' अस्य कथनस्य किं तात्पर्यम्?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) ×5 (अङ्कः)=20**

14. 'स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम्' इत्यस्य सूत्रस्य प्रयोजनं विलिख्य सूत्रान्तर्गतानां पदानां प्रयोजनं स्पष्टयत।

15. सन्निकर्षस्य प्रमाणत्वं समीक्षयत।

16. 'इन्द्रियवृत्तिः कथं न प्रमाणम्' इति कथनं स्पष्टयत।

17. ज्ञानान्तरवेद्यवादस्य समीक्षा कार्या।

18. अचेतनज्ञानवादः कः? तस्य स्वरूपं विलिख्य दोषान् प्रदर्शयत।

19. प्रमाणस्य प्रामाण्यविषये प्रचलितानां विविधमतानां समीक्षणं कुरुत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

20. दार्शनिकसाहित्ये 'प्रमेयकमलमार्तण्डः' इत्यस्य ग्रन्थस्य महत्त्वं योगदानं च स्पष्टयत।

21. 'ज्ञानमेव प्रमाणं भवितुमर्हति' इति वचनं समर्थयन् प्राप्तिपरिहारविचारः करणीयः।

22. स्वसंवेदनज्ञानवादेन किं प्रयोजनम्? लक्षणपुरस्सरं समीक्षणं च करणीयम्।

# A-I/2/22AJDS1CCTC2/23

**प्रथमसत्रार्द्धम्**

**द्वितीयपत्रम्**

**जैनदर्शनम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) ×2 (अङ्कः)=20**

1. जैनदर्शने कति द्रव्याणि स्वीकृतानि?
2. द्रव्यस्य किं लक्षणम्?
3. ध्रौव्यं नाम किम्?
4. उपयोगः कतिविधः? नामानि लिखत।
5. कालद्रव्यस्य किं लक्षणम्?
6. धर्मास्तिकायस्य सोदाहरणं लक्षणं लिखत।
7. पुद्गलद्रव्यस्य लक्षणं किम्?
8. अनस्तिकायत्वेन किं द्रव्यं वर्तते?
9. परमाणोः लक्षणं किम्?
10. शब्दः कस्मिन् द्रव्ये परिगण्यते?
11. आकाशद्रव्यस्य लक्षणसहितं भेदान् लिखत।
12. पुद्गलद्रव्यस्य के–के भेदाः सन्ति?
13. ज्ञानोपयोगस्य भेदाः के सन्ति?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) ×5 (अङ्कः)=20**

14. जीवः संसारे कस्मात् कारणात् परिभ्रमति? तस्य च मुक्तेः उपायाः के सन्ति?
15. पुद्गलद्रव्यं संक्षेपेण विशदयत।

16. धर्माधर्मद्रव्ययोः स्वरूपं वर्णयत।

17. द्रव्येषु मूर्तामूर्तत्वं वर्णयत।

18. सिद्धजीवस्य स्वरूपं स्पष्टयत।

19. द्रव्याणां ज्ञानस्य किं फलम्? व्याख्यात।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

20. कुन्दकुन्दाचार्यकृतद्रव्यविवेचनं विस्तरेण कुरुत।

21. जीवद्रव्यं विस्तरेण विशदयत।

22. द्रव्यगुणपर्यायाणां परस्परं भेदाभेदत्वं वर्णयत।

# A-I/3/22AJDS1CCTC3/23

## प्रथमसत्रार्द्धम्

## तृतीयपत्रम्

## जैनदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) ×2 (अङ्कः)=20**

1. जीवस्य किं लक्षणं प्रोक्तम्?
2. ज्ञानं किमभिधीयते?
3. पञ्चसम्यग्ज्ञानानि कानि? नामानि लिखत।
4. 'आभिणिबोहियणाणं' इत्यनेन किमुक्तम्?
5. विपर्ययज्ञानानि कानि? नामानि लिखत।
6. शुभोपयोगः कः?
7. अतीन्द्रियज्ञानं किमुच्यते?
8. शुद्धोपयोगः किमुच्यते?
9. केवलज्ञानस्य किं लक्षणं प्रोक्तम्?
10. अशुभोपयोगः कः?
11. आत्मा–ज्ञानप्रमाणं कथं सिद्ध्यति?
12. विभङ्गज्ञानेन किं तात्पर्यम्?
13. तत्त्वार्थवार्तिकस्य ग्रन्थकारः कः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) ×5 (अङ्कः)=20**

14. जीवस्य स्वरूपं विवेचयत।
15. मतिज्ञानस्य स्वरूपं लिखत।

16. अतीन्द्रियज्ञानस्य भेदाः संक्षेपेण विवेचनीयाः।

17. आत्मज्ञानयोः ऐक्यं स्पष्टयत।

18. संसारिणां मिथ्याज्ञानम् अज्ञानं कथं सिद्ध्यति? स्पष्टयत।

19. ज्ञानज्ञेययोः परस्परं स्वातन्त्र्यं स्पष्टयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

20. 'मतिश्रुतावधिमनः पर्ययकेवलानि ज्ञानम्' इति सूत्रम् अधिकृत्य तत्त्वार्थश्लोकवार्तिकदिशा विशिष्टं विवेचनं कुरुत।

21. सर्वार्थसिद्धिकारस्य आचार्यपूज्यपादस्य योगदानं स्पष्टयत।

22. आचार्यकुन्दकुन्दस्य कर्तृत्वं योगदानञ्च लिखत।

# A-I/4/22AJDS1CCTC4/23

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## जैनदर्शनम्

**समय: घण्टाद्वयम्** **पूर्णाङ्का: 60**

### खण्ड: – क

**केचन दश प्रश्ना एव समाधेया:।** **10 (प्रश्न:) ×2 (अङ्क:)=20**

1. श्रमणस्य स्वरूपं किम्?
2. णमोकारमन्त्रस्य माहात्म्यं लिखत।
3. 'परमेष्ठी' इत्यनेन किं तात्पर्यम्?
4. शरणानि कानि?
5. परिग्रह: क: भवति?
6. हिंसाया: लक्षणं किम्?
7. संसारस्य कारणं किम्?
8. बन्धस्य स्वरूपं किम्?
9. अहिंसा का भवति?
10. श्रमणस्य आवश्यकानि कानि?
11. महाव्रतस्य स्वरूपं किम्?
12. तपस: स्वरूपं किम्?
13. सर्वपापनिमित्तक: क:?

### खण्ड: – ख

**केचन चत्वार: प्रश्ना एव समाधेया:।** **4 (प्रश्न:) ×5 (अङ्क:)=20**

14. पुण्यं परमार्थतो हितकरं अस्ति न वा? वर्णयत।
15. कर्मबन्धहेतव: के भवन्ति? विशदयत।

16. आगमस्य स्वरूपं महत्त्वं च वर्णयत।

17. नयानां स्वरूपं प्रतिपादयत।

18. महाव्रतानां स्वरूपं महत्त्वं च वर्णयत।

19. मोहस्य स्वरूपं विशदयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

20. जिनेन्द्रशासनस्य स्वरूपं महत्त्वं च प्रतिपादयत।

21. श्रमणधर्मस्य स्वरूपं महत्त्वं च वर्णयत।

22. वर्तमानसन्दर्भे अहिंसायाः स्वरूपं महत्त्वं च स्पष्टयत।